# Amalaki

**वयस्थामलकी वृष्या जातीफलरसं शिवम् ।**
**धात्रीफलं श्रीफलं च तथामृतफलं स्मृतम् ॥**
**त्रिष्वामलकमाख्यातं धात्री तिष्यफलामृता । (Bpn)**

Amalaki is other wise called vayastha, vrsya, jatiphalarasam, sivam, dhatriphalam, sriphalam, amrtaphalam, trisvamalaka, dhatri, tisyaphalamrta.

**वयःस्थाऽऽमलकं वृष्यं जातीफलरसं शिवम् ।**
**धात्रीपलं श्रीफलं च तथाऽमृतफलं स्मृतम् ॥ (Dhn)**

Vayastha, Amalakam, Vrsyam, Jatiphalarasam, Sivam, Dhatriphalam, Sriphalam, Amrta phalam - these are the other names for Amalaki.

**आमलकी वयःस्था च श्रीफला धात्रिका तथा ।**
**अमृता च शिवा शान्ता शीताऽमृतफला तथा ॥**
**जातीफला च धात्रेयी ज्ञेया धात्रीफला तथा ।**
**वृष्या वृत्तफला चैव रोचनी शरभूह्वया ।(Rjn)**

Amalaki is otherwise called Vayastha, Sriphala, Dhatrika, Amrta, Siva, Santa, Sita, Amrta phala, Jati phala, Dhatreyi, Dhatri phala, Vrsya, Vrtta phala, Rocani, Sarabhuhvaya.

**कफपित्तहरं वृष्यं अम्लमामलकं तथा ।**
**भेदनं मधुरं पाके रुच्यं वीर्ये हिमं मृदु ॥ (Mdn)**

Amalaki is amla in rasa, mrdu in guna, hima in veerya, madhura in paka, bhedana in karma, vrsya, rucya, alleviates kapha and pitta.

**हरीतकीसमं धात्रीफलं किन्तु विशेषतः ।**
**रक्तपित्तप्रमेहघ्नं परं वृष्यं रसायनम् ॥**

हन्ति वातं तदाम्लत्वात्पित्तं माधुर्यशैत्यतः ।
कफं रूक्षकषायत्वात्फलं धात्र्यास्त्रिदोषजित् ।।
यस्य यस्य फलस्येह वीर्यं भवति यादृशम् ।
तस्य तस्यैव वीर्येण मज्जानमापि निर्दिशेत् ।। (Bpn)

Dhatriphala is similar to haritaki phala but specifically it is used in raktapitta, prameha. It is param vrsya, rasayana, vata hara due to amla rasa, pitta hara due to madhura rasa and sita veerya, reduces kapha because it is ruksa in guna, kashaya in rasa. Its phala is tridoshajit. Its majja also has virya similar to the virya of the phala.

कषायं कटुतिक्ताम्लं स्वादु चामलकं हिमम् ।
सरं त्रिदोषहृद् वृष्यं ज्वरघ्नं च रसायनम् ।।
हन्ति वातं तदम्लत्वात्पितं माधुर्यशैत्यतः ।
कफं रूक्षकषायत्वात्फलं धात्र्यास्त्रिदोशजित् ।। (Dhn)

Amalaki is katu, tikta, amla, madhura in rasa, hima in veerya, sara in guna, vrsya-jvaraghna-rasayana in karma, tridosha hara, vata hara due to amla rasa, does not increase pitta because it is sita in veerya, kapha hara due to ruksa guna and kashaya rasa. Its fruit is tridosha hara.

आमलकं कषायाम्लं मधुरं शिशिरं लघु ।
दाहपित्तवमीमेहशोफघ्नं च रसायनम् ।।
कटुमधुरकषायं किञ्चिदम्लं कफध्नं ।
रुचिकरमतशीतं हन्ति पित्तास्रतापम् ।।
श्रमवमनविबम्धाध्मानविष्टंभदोष -
प्रशमनममृताभं चामलक्याः फलं स्यात् ।। (Rjn)

Amalaki is kashaya, amla, madhura in taste, sita in potency, laghu in property, daha-pitta-vami-meha-sopha hara, rasayana. Its phala is katu, madhura, kashaya, kincit amla in taste, kapha hara, ruci kara, ati sita in potency, pacifies pitta- asra- tapam- srama- vamana- vibandha- adhmana- vistambha- dosha. It is amrtabha (like nectar).

अम्लं समधुरं तिक्तं कषायं कटुकं सरम् ।
चक्षुष्यं सर्वदोषध्नं वृष्यमामलकी फलम् ॥
हन्ति वातं तदम्लत्वात्पित्तं माधुर्यशैत्यतः ।
कफं रूक्षकषायत्वात्फलेभ्योऽभ्यधिकं च तत् ॥ (Su.S.Su ४६)

Amalaki phala is amla, madhura, tikta, kashaya, katuka in taste, sara in property, caksushya, sarva doshaghna and vrsya. It is vata hara since it is amla in rasa, pitta hara since it is madhura in taste and sita in potency, kapha hara since it is ruksha in property, kashaya in taste.

आमलक्याः फलं किञ्चित्कटुकं स्वादु तिक्तकम् ।
अम्लं च तुवरं शीतं जराव्याधिविनाशनम् ॥
वृष्यं केश्यं सारकं च हितं चारुचिनाशकम् ।
रक्तपित्तं प्रमेहं च विषजूर्त्तिवमिं तथा ॥
आध्मानं बद्धविट्कत्वं शोफं शोषं तृषां तथा ।
रक्तस्य विकृतिं चैव त्रिदोषं चैव नाशयेत् ॥
अम्लत्वाद्वातहं प्रोक्तं माधुर्याच्चैव शीततः ।
पित्तनाशकरं चोक्तं रूक्षत्वाच्च काषायतः ॥
कफनाशकरं प्रोक्तं पूर्वैर्विद्याविशारदैः ।
आमलस्य फलं शुष्कं तिक्तमम्लं कटुस्मृतम् ॥
मधुरं तुवरं केश्यं भग्नसन्धानकारकम् ।
धातुवृद्धिकरं नेत्र्यं लेपनात्कन्तिकारकम् ॥
पित्तं कफं तृषां घर्मं मेदोरोगं विषं तथा ।
त्रिदोषं नाशयत्येवं पूर्वाचार्यैर्निरूपितम् ॥ (Nir)

Amalaki phala is kincit katuka, svadu, tiktaka, amla, tuvara in rasa, sita in veerya, jara vyadhi hara, vrsya, kesya, saraka, aruci nasaka, is used in raktapitta, prameha, visa, vami, adhmana, baddhavit, sopha, sosa, trsa, raktasya vikrti, tridosha hara. Since it amla in taste it is vata hara, madhura in taste and sita in potency it is pitta hara, since it is ruksa and kashaya it is kapha hara. Amalaki suska phala is tikta, amla, katu, madhura, tuvara in taste, kesya, bhagna sandhana karaka, dhatu vrddhi kara, netrya, on lepana it is kanti karaka and is used in pitta, kapha, trsa, gharma (summer season), medoroga, visa and is tridosha nasana.

तद्वत् धात्री स्वेदमेदोहराम्ला शुक्लला हिमा ।
भग्नसन्धानकृत् केश्या पिपासाकफपित्तहृत् ॥
तन्मज्जा तुवरः स्वादुस्तृट्च्छर्द्यनिलपित्तहा ।
हन्ति वातं तदम्लत्वात् पित्तं माधुर्यशैत्यतः ॥
कफं रूक्षकषायत्वात् फलेभ्योऽभ्यधिकं मतम् ।
चक्षुष्यं सर्वदोषघ्नं वृष्यमामलकीफलम् । (Kdn)

Dhatri is amla in rasa, hima in veerya, sveda-meda hara, sukrala in karma, bhagna sandhana krt, kesya, pipasa hara, and kapha pitta hara. Its majja is tuvara, svadu in taste, reduces trt, chardi, anila pitta, vatahara due to amlarasa, it does not produce pitta because it is sita in potency, reduces kapha due to ruksa property and kashaya rasa. Phala is caksushya, sarvadoshaghna and vrsya.

आदौ अन्ते व मध्ये च भोजनस्य प्रशस्यते ।
निरत्ययं दोषहरं फलेष्वामलकीफलम् ॥ (Rav)

Amalaki phala is good if taken in the beginning, middle and at the end of the meal every day as it is dosha hara.

तन्मज्जा प्रदरच्छर्दिवातपित्तज्वरापहा ।
कषायमधुरा वृष्या श्वासकासनिबर्हणा ॥ (Sgn)

Its majja is used in pradara, chardi, vata, pitta, jvara. It is kashaya, madhura in taste, vrsya, and used in svasa and kasa.

विद्यादामलके सर्वान् रसान् लवणवर्जितान् ।
रूक्षं स्वादु कषायाम्लं कफपित्तहरं  परम् ॥ (C.S.Su)

Amalaki has all the tastes except Lavana rasa. It is Ruksa in Property, Svadu, Kashaya, Amla in Taste, Kapha Pitta hara param.

.....आमलकं शीतमम्लं पित्तकफापहम् ।
कटु पाके हिमं केश्यं .... (A.Hr.Su.६)

"................. Amalaki is Sita in Potency, Amla in Taste, Pitta Kapha hara, Katu in Vipaka, is Sita in Property and is Kesya in Karma.................."